कर्णाटक सर्वकारः

# पर्याय–शैक्षणिकयोजना –2021

## संस्कृतनन्दिनी –2 SAMSKRITA-NANDINEE-2

### प्रथमभाषा – संस्कृतम् FIRST LANGUAGE SAMSKRITAM

### नवमी कक्ष्या 9TH STANDARD

विषयपरिणिताः –


1. **वि॥ नरसिंह भागवतः**, जनसेवा विद्याकेन्द्र चन्नेनहळ्ळि, बेङ्गलूरु ।
2. **वि॥ देवरु भट्टः** , आर्. वि. बालिका –प्रौढशाला जयनगर बेङ्गलूरु ।
3. **वि॥ प्रसाद भट्टः**, भारतमाता बालिका– प्रौढशाला हनुमन्तनगर, बेङ्गलूरु ।



**शिक्षकाणां वृत्तिपरप्रगतिः**
**शिक्षणम् एवं प्रशिक्षणसंस्था, बेङ्गलूरुमण्डलम्**

| क्रम सङ्ख्या | मासः / सप्ताहः<br>**Month / week** | अधिगमफलानि<br>**Learning out come** | क्रियाकलापः<br>**Activity** | मौल्यमापनम्<br>**Evaluation** |
|---|---|---|---|---|
| 1 | **अगष्ट् ( August)**<br>–2021 | | | |
| | **प्रथमसप्ताहः(1st week)**<br>क्रियाकलापः–1 | **सेतुपाठः–**<br>• वर्णमाला–स्मरणम् | स्वर–अयोगवाह–व्यञ्जनानां पुनः स्मरणम् ।<br>वर्गीय–अवर्गीयव्यञ्जनानां विभागः, अल्पप्राण–महाप्राणव्यञ्जनानां विभागः च ज्ञायते ।<br>कर्कश–मृदुव्यञ्जनानि पृथक्कृत्य लेखनम् । | ह्रस्व–दीर्घस्वरान् विभज्य लिखत ।<br>अल्पप्राण–महाप्राण–व्यञ्जनानि लिखत । |
| | क्रियाकलापः–2 | • माहेश्वर–सूत्राणि ।<br>• वर्णानां ज्ञानम् । | माहेश्वरसूत्राणां क्रमशः लेखनम् ।<br>प्रत्यहारलेखनम् । | माहेश्वरसूत्राणि वदत ।<br>अट्, अण्, जश् इत्यादि प्रत्यहारान् लिखत । |
| | क्रियाकलापः–3 | सुबन्तम्<br>सप्तविभक्तीनां परिचयः । | लिङ्गानां परिचयः।<br>वर्णानां परिचयः।<br>विभक्तीनां परिचयः । | वाक्ये विद्यमानानां पदानां विभक्तिं लिखत ।<br>अनुच्छेदे विद्यमानानि पदानि वचनानुसारं पृथक् कुरुत । |
| | **द्वितीयसप्ताहः(2nd week)**<br>क्रियाकलापः–1 | पूर्वज्ञात संख्याः, वासरः, समयः च स्मर्यन्ते । | सङ्ख्या प्रथमतः पञ्चाषत् (1–50) पर्यन्तं लेखनम् ।<br>सप्तवासराणां नामानि । | विंशतिः तः पञ्चाशत् पर्यन्तं लिखत ।<br>वासरनामानि लिखत । |

| | | | | |
|---|---|---|---|---|
| | | | समयस्य प्रयोगकौशलम् । | |
| | क्रियाकलापः–2 | तिङन्तम्, धातुः , विकरणप्रत्ययः, आख्यातप्रत्ययानां ज्ञानम्। लट् लकारस्य ज्ञानम् । | वाक्यरचनाद्वारा क्रियापदस्य महत्त्वस्य ज्ञानम् । दशलकाराणां लेखनम् अवगमनं च । | तिङन्तम् उपयुज्य लघुवाक्यानि रचयत। भूधातोः लट्लकाररूपाणि लिखत । |
| | क्रियाकलापः–3 | सन्धीनां सामान्यपरिचयः । स्वरसन्धीनां विभजनं संयोजनं च कर्तु समर्थः भवन्ति । | अच्सन्धीनां सामान्यनियमानां लेखनम् । सवर्णदीर्घ–गुण–यण्–वृद्धि–आदीनां सन्धिपदानां विभजनम्,संयोजनम् च। | सतीशः, वनौषधम्, देवालयः, परोपकारः इत्यादिपदानां विभजनपूर्वकं सन्धिनाम लिखत । |
| | **तृतीयसप्ताहः (3rd week)** क्रियाकलापः–1 | **शरणं प्रपद्ये –पद्यम्** पठनम् । रागबद्धगायनम् । | शिक्षकमनुसृत्य छात्राणाम् अनूच्चारणम् । | कण्ठपाठः। अन्यदेवतानां स्तोत्राणां सङ्ग्रहः । |
| | क्रियाकलापः–2 | अन्वयानुसार–अर्थविवरणम् स्तोत्रतात्पर्यज्ञानम् | स्तोत्रे विद्यमानानां पदानाम् विभक्त्यनुसारं लेखनम् | ग्रन्थम् अदृष्ट्वा स्तोत्रगायनम् । |
| | क्रियाकलापः–3 | प्रार्थनायाः वैशिष्ट्यावगमनम् । भारतीयसंस्कृतेः परिचयः भवति । क्रियापदानां परिचयः । | पर्वणां वैशिष्ट्यविषये लेखनम् । लट्–लोट्लकार– रूपाणां सङ्ग्रहः । | पर्वविषयकपुस्तकानां पठनम् । पुरुषत्रये लट्–लोट्लकाराणां लेखनम् । |
| | क्रियाकलापः–4 | प्रश्नानाम् उत्तरकरण सामर्थ–अर्जनम् । पदानाम् अर्थानुगुणं संयोजन–विभजन–अन्वयसामर्थ्य–सम्पादनम् । | प्रश्नवाक्यनिर्माणम् । स्तोत्राणि आधृत्य समानार्थक–पदानां चयनम् । | विरचितप्रश्नानाम् उत्तरकरणम् । अध्यापकैः प्रदत्त –अनुच्छेदस्थ –रिक्तस्थानस्य |

| | | | | |
|---|---|---|---|---|
| | | | | मञ्जूषातः पदं चित्वा प्रपूरणम् । |
| | **चतुर्थसप्ताहः(4th week)**<br>क्रियाकलापः–1 | **सुबंन्तः – व्याकरणपाठः ।**<br>प्रातिपदिकस्य परिचयः।<br>अजन्तशब्दानां परिचयः । | सुप्–प्रत्ययानां लेखनम् ।<br>प्रातिपदिकेन सह सुप्–प्रत्ययस्य योजनेन पदोत्पत्तिः । | अकारान्त–इकारान्तादिशब्दानां लेखनाभ्यासः । |
| | क्रियाकलापः–2 | हलन्तशब्दानां परिचयः ।<br>लिङ्ग–विभक्ति–वचनानां परिचयः । | राजन्, मनस्,भवत् इत्यादि–शब्दानाम् अध्ययनम् ।<br>लिङ्ग–विभक्ति–वचनपुरस्सरं शब्दरूपाणां लेखनम् । | मरुत्–शब्दस्य चतुर्थीविभक्तिरूपाणि लिखत ।<br>वाच्–शब्दस्य सप्तमीविभक्तिरूपाणि लिखत । |
| | क्रियाकलापः–3 | सर्वनामशब्दानां परिचयः ।<br>लघुवाक्यरचनाज्ञानम् । | एतद्,सर्व–आदिशब्दानां ज्ञानं प्राप्य तेषां प्रयोगकौशलसम्पादनम् । | अधीतशब्दान् उपयुज्य पञ्च–लघुवाक्यानि लिखत । |
| | क्रियाकलापः–4 | पाठ्यांशे विद्यमानाम् पदानां लिङ्ग–विभक्ति–वचनज्ञानम् ।<br>शब्दानां सिद्धरुपाणि जानन्ति ।<br>शब्दानां अकारान्त–इकारान्तादिरूपाणां ज्ञानं प्राप्य शब्दान्तरेषु तौलनिककार्यं कुर्वन्ति । | प्रदत्त–अनुच्छेदे पुंल्लिङ्ग–स्त्रीलिङ्ग–नपुंसकलिङ्गशब्दानां पृथक्–कृत्य लेखनम् । | अधीतपाठे विद्यमानम् अनुच्छेदमेकं स्वीकृत्य तत्रस्थ–षष्ठी–सप्तमीविभक्तिरूपाणि सङ्गृह्य लिखत । |

**************